श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री ताताचारियर् विरचिता

# ॥ श्रीकोदण्डराम सुप्रभात श्लोकाः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकोदण्डराम सुप्रभात श्लोकाः ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्॥ 1 ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गळं कुरु॥ 2 ॥

कण्वादिमुनिसन्दृष्ट मन्वादिनृपवंशज।
अण्वादि भूत संपूर्ण तन्वादि सुखदायक॥ 3 ॥

कासार तीर वडुवूर् पुर सौम्यमूर्ते
सीतालतावलित पुष्पित पारिजात।
केदार मध्य विलसत् बकुळाटवीश
प्राभातिकं वितनुतां तव दर्शनं नः॥ 4 ॥

प्राची दिशाङ्गणमिहैति रविप्रकाशः
गाढान्धकार पटलोपिविलीयतेऽद्य।
आवाति मन्दमनिलः कमलालयोत्थः
कोदण्डराम भगवन् तव सुप्रभातम्॥ 5 ॥

ब्रह्मादि देव निवहः त्वदुपासनाय
भक्ति प्रभाव परिपक्त्रिम भावबन्धः।
युक्तः सनन्दन मुखैः त्वरयोपयातः
कोदण्डराम भगवन् तव सुप्रभातम्॥ 6 ॥

सप्तर्षयो मुनिवराः कुसुमोपहाराः
दिव्यापगाविमल नीर कृतावगाहाः।
त्वत्सन्निधौ सममिलन्त्यधुनावियत्तः
कोदण्डराम भगवन् तव सुप्रभातम्॥ 7 ॥

त्वन्मन्दहासचिबुकाधर दर्शनाय
कासारयोगि परकालमुखादि भक्ताः।
सत्वोत्तराः प्रविलसन्ति तवालयान्तः
कोदण्डराम भगवन् तव सुप्रभातम्॥ 8 ॥

योगीशनाथ मुनियामुन शैल पूर्ण
श्रीभाष्यकार निगमान्त गुरूत्तमास्त्वाम्।
गोष्ठीनिविष्टमणयः प्रतिपालयन्ति
कोदण्डराम भगवन् तव सुप्रभातम्॥ 9 ॥

शत्रुञ्जयो गजपतिर्भवतः प्रसिद्धः
लक्ष्मीनिवास सुभगा सुरभिः सुवत्सा।
दिव्यो हयश्च तव सन्निधिमाश्रयन्ते
कोदण्डराम भगवन् तव सुप्रभातम्॥ 10 ॥

वैताळिका विविध वाद्यविशेषनादैः
कर्णाभिराम रचने स्तुतिमारभन्ते।
तिष्ठन्ति देववनिताश्च करात्तदीपाः
कोदण्डराम भगवन् तव सुप्रभातम्॥ 11 ॥

आभीरताम दधि मन्थन दिव्य घोषः
त्वत्पुण्य नाम सहितो वियदावृणोति।
प्रासादपञ्जरशुकाः कलमालपन्ति
कोदण्डराम भगवन् तव सुप्रभातम्॥ 12 ॥

गङ्गादिसप्त सरिदाहृत तीर्थकुम्भान्
एलालवङ्गतुळसी घनसार गन्धान्।
आदाय भूसुरवराः प्रतिपालयन्ति
कोदण्डराम भगवन् तव सुप्रभातम्॥ **13**॥

शङ्खध्वनिं श्रवण मङ्गळतूर्य घोषं
वीणानिनाद सहितं शृणुतां शरण्य।
दीपोज्वलत्कनकपात्रकराश्च कन्याः
तिष्ठन्ति राघवविभो तव सुप्रभातम्॥ **14**॥

दिव्योत्सवेषु तव नूतनसन्निवेशं
दिव्यं विलोक्य भवदेकपरायणानाम्।
संसार एषनितरां अपवर्ग एव
कोदण्डराम भगवन् तव सुप्रभातम्॥ **15**॥

वेदान्तयुग्म परिनिष्ठितमानसानां
वेदान्तिनां नियतवास इहेति कृत्वा।
एतत् स्थलं समभवत् हृदयङ्गमं किं
कोदण्डराम भगवन् तव सुप्रभातम्॥ **16**॥

श्रीकुम्भकोण नगराधिपशार्ङ्गराज
सान्निध्य कल्पित शठारिकृताभिमान।
श्रीपाञ्चरात्रविहितक्रम नित्यकल्प
कोदण्डराम भगवन् तव सुप्रभातम्॥ **17**॥

आहोबिलोत्तम मठाधिपसूरिवर्यैः
श्रीरङ्गनाथ मणिपादु यतीश्वराश्च।
मैसूरवर्ति परकाल मठाधिपाश्च
संप्रापुरद्य भगवन् तव सुप्रभातम्॥ **18**॥

यज्ज्यारवः सुमनसां मृदुवादगीतं
    दृप्तात्मनां प्रबलभीकर मेघघोषः।
तत्तादृगेष तव हस्तगतो हि चापः
    सद्यश्शरण्य जनताघ मपाकरोतु ॥ **19** ॥

कोदण्डमण्डितकरं प्रियया समेतं
    वीथीविहाररसिकं शिबिकाधिरूढम्।
स्वेदोद्भव प्रविलसन्मुखमम्बुजाक्षं
    त्वां वीक्ष्य सात्विकवराः कृतिनो भवन्ति ॥ **20** ॥

हे राम हे रघुपते करुणैकसिन्धो
    हे जानकीरमण हे विबुधैकनाथ।
हे वातसूनुपरमप्रिय हे मुकुन्द
    कोदण्डराम भगवन् तव सुप्रभातम् ॥ **21** ॥

प्रत्यूष कालनियतं तव सुप्रभातं
    स्तोत्रं मया विरचितं त्वदनुग्रहेण।
ब्रह्मास्त्र सारयुत जीर्णतृणानुवृत्या
    सर्वं क्षमस्व भगवन् तव सुप्रभातम् ॥ **22** ॥

॥ इति श्रीकोदण्डराम सुप्रभात श्लोकाः समाप्ता ॥